সুংদর কাংড নির্ণয়
(হনূমৎপ্রতিয়ানম)
অথ সপ্তমোঽধ্যায়ঃ

ওং | রামায় শাশ্বতসুবিস্তৃতষড্গুণায় সর্বেশ্বরায় সুখসারমহার্ণবায় |
নত্বা লিলং ঘয়িষুরর্ণবমুৎপপাত নিষ্পীড্য তং গিরিবরং পবনস্য সূনুঃ || ৭.১ ||

চুক্ষোভ বারিধিরনুপ্রয়য়ৌ চ শীঘ্রং য়াদোগণৈঃ সহ তদীয়বলাভিকৃষ্টঃ |
বৃক্ষাশ্চ পর্বতগতাঃ পবনেন পূর্বং ক্ষিপ্তোঽর্ণবে গিরিরুদাগমদস্য হেতোঃ || ৭.২ ||

স্যালো হরস্য গিরিপক্ষবিনাশকালে ক্ষিপ্ত্বাঽর্ণবে স মরুতোর্বরিতাত্মপক্ষঃ |
হৈমো গিরিঃ পবনজস্য তু বিশ্রমার্থমুদ্ভিদ্য বারিধিমবর্দ্ধদনেকসানুঃ || ৭.৩ ||

নৈবাত্র বিশ্রমণমৈচ্চত নিঃ শ্রমোঽসৌ নিঃ সীমপৌরুষগুণস্য কুতঃ শ্রমোঽস্য |
আশ্লিষ্য পর্বতবরং স দদর্শ গচ্চন দেবৈস্তু নাগজননীং প্রহিতাং বরেণ || ৭.৪ ||

জিজ্ঞাসুভির্নিজবলং তব ভক্ষমেতু য়দ্যত ত্বমিচ্চসি তদিত্যমরোদিতায়াঃ |
আস্যং প্রবিশ্য সপদি প্রবিনিঃ সৃতোঽস্মাদ দেবাননন্দয়দুত স্বৃতমেষু রক্ষন || ৭.৫ ||

দৃষ্ট্বা সুরপ্রণয়িতাং বলমস্য চোগ্রং দেবাঃ প্রতুষ্টুবুরমুং সুমনোভিবৃষ্ট্যা |
তৈরাদৃতঃ পুনরসৌ বিয়তৈব গচ্চন চায়াগ্রহং প্রতিদদর্শ চ সিং হিকাখ্যম || ৭.৬ ||

লং কাবনায় সকলস্য চ নিগ্রহেঽস্যাঃ সামর্থ্যমপ্রতিহতং প্রদদৌ বিধাতা |
চায়ামবাক্ষিপদসৌ পবনাত্মজস্য সোঽস্যাঃ শরীরমনুবিশ্য বিভেদ চাঽশু || ৭.৭ ||

নিস্সীমমাত্মবলমিত্যনুদর্শয়ানো হত্বৈব তামপি বিধাতৃবরাভিগুপ্তাম |
লম্বে স লম্বশিখরে নিপপাত লং কাপ্রাকাররূপকগিরাবথ সংচুকোচ || ৭.৮ ||

ভূত্বা বিলালসমিতো নিশি তাং পুরীং চ প্রাপ্স্যন দদর্শ নিজরূপবতীং স লং কাম |
রুদ্ধোঽনয়াঽশ্বথ বিজিত্য চ তাং স্বমুষ্টিপিষ্টাং তয়াঽনুমত এব বিবেশ লং কাম || ৭.৯ ||

মার্গমাণো বহিশ্চান্তঃ সোঽশোকবনিকাতলে |
দদর্শ শিং শপাবৃক্ষমূলস্থিতরমাকৃতিম || ৭.১০ ||

নরলোকবিডম্বস্য জানন রামস্য হৃদ্গতম |
তস্য চেষ্টানুসারেণ কৃত্বা চেষ্টাশ্চ সং বিদঃ |
তাদৃক্চেষ্টাসমেতায়া অং গুলীয়মদাত ততঃ || ৭.১১ ||

সীতায়া য়ানি চৈবাঽসন্নাকৃতেস্তানি সর্বশঃ |
ভূষণানি দ্বিধা ভূত্বা তান্যেবাঽসং স্তথৈব চ || ৭.১২ ||

অথ চূলামণিং দিব্যং দাতুং রামায় সা দদৌ |
য়দ্যপ্যেতন্ন পশ্যন্তি নিশাচরগণাস্তু তে |

দ্যুলোকচারিণঃ সর্বং পশ্যন্ত্যৃষয় এব চ || ৭.১৩ ||

তেষাং বিডম্বনায়ৈব দৈত্যানাং বংচনায় চ |
পশ্যতাং কলিমুখ্যানাং বিডম্বোঽয়ং কৃতো ভবেত || ৭.১৪ ||

কৃত্বা কার্য়মিদং সর্বং বিশংকঃ পবনাত্মজঃ |
আত্মাবিষ্করণে চিত্তং চক্রে মতিমতাং বরঃ || ৭.১৫ ||

অথ বনমখিলং তদ রাবণস্যাবলুপ্য ক্ষিতিরুহমিমমেকং বর্জয়িত্বাঽশু বীরঃ |
রজনিচরবিনাশং কাংক্ষমাণোঽতিবেলং মুহুরতিরবনাদী তোরণং চাঽরুরোহ ||
৭.১৬ ||

অথাশৃণোদ দশাননঃ কপীন্দ্রচেষ্টিতং পরম |
দিদেশ কিংকরান বহূন কপির্নিগৃহ্যতামিতি || ৭.১৭ ||

সমস্তশো বিমৃত্যবো বরাদ্ধরস্য কিংকরাঃ |
সমাসদন মহাবলম সুরান্তরাত্মনোঽং গজম || ৭.১৮ ||

অশীতিকোটিয়ূথপং পুরস্সরাষ্টকায়ুতম |
অনেকহেতিসংকুলং কপীন্দ্রমাবৃণোদ বলম || ৭.১৯ ||

সমাবৃতস্তথাঽয়ুধৈঃ স তাডিতশ্চ তৈর্ভৃশম |
চকার তান সমস্তশস্তলপ্রহারচূর্ণিতান || ৭.২০ ||

www.yogigma.com

পুনশ্চ মন্ত্রিপুত্রকান স রাবণপ্রচোদিতান |
মমর্দ সপ্ত পর্বতপ্রভান বরাভিরক্ষিতান || ৭.২১ ||

বলাগ্রগামিনস্তথা সশর্ববাক্সুগর্বিতান |
নিহত্য সর্বরক্ষসাং তৃতীয়ভাগমক্ষিণোত || ৭.২২ ||

লিঙ্গনৌপমং হরের্বলং নিশম্য রাক্ষসাধিপঃ |
কুমারমক্ষমাত্মনঃ সমং সুতং ন্যয়োজয়ত || ৭.২৩ ||

স সর্বলোকসাক্ষিণঃ সুতং শরৈর্ববর্ষ হ|
শিতৈর্বরাস্ত্রমন্ত্রিতৈর্ন চৈনমভ্যচালয়ত || ৭.২৪ ||

স মণ্ডমধ্যকাসুতং সমীক্ষ্য রাবণোপমম |
তৃতীয় এষ চাং শকো বলস্য হীত্যচিন্তয়ত || ৭.২৫ ||

নিধার্য় এব রাবণঃ স রাঘবস্য নান্যথা |
য়দীন্দ্রজিন্ময়া হতো ন চাস্য শক্তিরীক্ষ্যতে || ৭.২৬ ||

অতস্তয়োঃ সমো ময়া তৃতীয় এষ হন্যতে |
বিচার্য় চৈবমাশু তং পদোঃ প্রগৃহ্য পুপ্লুবে || ৭.২৭ ||

স চক্রবদ ভ্রমাতুরং বিধায় রাবণাত্মজম |
অপোথয়দ ধরাতলে ক্ষণেন মারুতী তনুঃ || ৭.২৮ ||

বিচূর্ণিতে ধরাতলে নিজে সুতে স রাবণঃ |
নিশম্য শোকতাপিতস্তদগ্রজং সমাদিশত || ৭.২৯ ||

অথেন্দ্রজিন্মহাশরৈর্বরাস্ত্রসম্প্রয়োজিতৈঃ |
ততক্ষ বানরোত্তমং ন চাশকদ বিচালনে || ৭.৩০ ||

অথাস্ত্রমুত্তমং বিধের্যুয়োজ সর্বদুষ্ষহম |
স তেন তাডিতো হরির্ব্যচিন্তয়ন্নিরাকুলঃ || ৭.৩১ ||

ময়া বরা বিলং ঘিতা হ্যনেকশঃ স্বয়ম্ভুবঃ |
স মাননীয় এব মে ততোঽত্র মানয়াম্যহম || ৭.৩২ ||

ইমে চ কুর্য়ুরত্র কিং প্রহৃষ্টরক্ষসাং গণাঃ |
ইতীহ লক্ষ্যমেব মে স রাবণশ্চ দৃশ্যতে || ৭.৩৩ ||

ইদং সমীক্ষ্য বদ্ধবত স্থিতং কপীন্দ্রমাশু তে |
ববন্ধুরন্যপাশকৈর্জগাম চাস্ত্রমস্য তত || ৭.৩৪ ||

অথ প্রগৃহ্য তং কপিং সমীপমানয়ং শ্চ তে |
নিশাচরেশ্বরস্য তং স পৃষ্টবাং শ্চ রাবণঃ || ৭.৩৫ ||

কপে কুতোঽসি কস্য বা কিমর্থমীদৃশং কৃতম |
ইতীরিতঃ স চাবদত প্রণম্য রামমীশ্বরম || ৭.৩৬ ||

অবৈহি দূতমাগতং দুরন্তবিক্রমস্য মাম |
রঘূত্তমস্য মারুতিং কুলক্ষয়ে তবেশ্বরম || ৭.৩৭ ||

ন চেত প্রদাস্যসি ত্বরন রঘূত্তমপ্রিয়াং তদা |
সপুত্রমিত্রবান্ধবো বিনাশমাশু য়াস্যসি || ৭.৩৮ ||

ন রামবাণধারণে ক্ষমাঃ সুরেশ্বরা অপি |
বিরিংচিশর্বপূর্বকাঃ কিমু ত্বমল্পসারকঃ || ৭.৩৯ ||

প্রকোপিতস্য তস্য কঃ পুরস্থিতৌ ক্ষমো ভবেত |
সুরাসুরোরগাদিকে জগত্যচিন্ত্যকর্মণঃ || ৭.৪০ ||

ইতীরিতে বধোদ্যতং ন্যবারয়দ বিভীষণঃ |
স পুচ্ছদাহকর্মণি ন্যয়োজয়ন্নিশাচরান || ৭.৪১ ||

অথাস্য বস্ত্রসংচয়ৈঃ পিধায় পুচ্ছমগ্নয়ে |
দদুর্দদাহ নাস্য তন্মরুৎসখো হুতাশনঃ || ৭.৪২ ||

মমর্ষ সর্বচেষ্টিতং স রক্ষসাং নিরাময়ঃ |
বলোদ্ধতশ্চ কৌতুকাত প্রদগ্ধুমেব তাং পুরীম || ৭.৪৩ ||

দদাহ চাখিলং পুরং স্বপুচ্ছগেন বহ্নিনা |
কৃতিস্তু বিশ্বকর্মণোঽপ্যদহ্যতাস্য তেজসা || ৭.৪৪ ||

সুবর্ণরত্নকারিতাং স রাক্ষসোত্তমৈঃ সহ |
প্রদহ্য সর্বশঃ পুরীং মুদাঽন্বিতো জগর্জ চ || ৭.৪৫ ||

স রাবণং সপুত্রকং তৃণোপমং বিধায় চ |
তয়োঃ প্রপশ্যতোঃ পুরং বিধায় ভস্মসাদ য়যৌ || ৭.৪৬ ||

বিলং ঘ্য চার্ণবং পুনঃ স্বজাতিভিঃ প্রপূজিতঃ |
প্রভক্ষ্য বানরেশিতুর্মধু প্রভুং সমেয়িবান || ৭.৪৭ ||

রামং সুরেশ্বরমগণ্যগুণাভিরামং সম্প্রাপ্য সর্বকপিবীরবরৈঃ সমেতঃ |
চূলামণিং পবনজঃ পদয়োর্নিধায় সর্বাং গকৈঃ প্রণতিমস্য চকার ভক্ত্যা || ৭.৪৮ ||

রামোঽপি নান্যদনুদাতুমমুষ্য য়োগ্যমত্যন্তভক্তিপরমস্য বিলক্ষ্য কিংচিত |
স্বাত্মপ্রদানমধিকং পবনাত্মজস্য কুর্বন সমাশ্লিষদমুং পরমাভিতুষ্টঃ || ৭.৪৯ ||

ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্যবিরচিতে
শ্রীমহাভারততাৎপর্যনির্ণয়ে
শ্রীরামচরিতে হনূমৎপ্রতিয়ানং নাম সপ্তমোঽধ্যায়ঃ